6.षष्ठः पाठः

# मथुरायात्रा

भवान् / भवन्तौ / भवन्तः
भवती / भवत्यौ / भवत्यः

भगवान् श्रीकृष्णः गोकुले आसीत् । तदा अक्रूरः तत्र आगच्छति । सः वदति "हे कृष्ण! भवान् मथुराम् आगच्छतु । मातुलः कंसः आयुधपूजार्थम् आह्वयति" इति ।

अक्रूरः वदति "भवन्तौ सज्जौ भवताम् । अहं रथम् आनयामि ।"

सः रथम् आनयति । तदा गोपिकाः तत्र आगच्छन्ति । ताः कृष्णं वदन्ति - "कृष्ण! भवान् मथुराम् मा गच्छतु । अत्र एव तिष्ठतु । अन्यथा अस्मान् अपि मथुरां नयतु ।"

कृष्णः वदति - "भवत्यः अत्र एव भवन्तु । स्वकार्याणि कुर्वन्तु । "सः राधां वदति - "भवती चिन्तां मा करोतु । अहं शीघ्रं प्रत्यागच्छामि ।"

गोपाः अपि तत्र आगच्छन्ति । तदा बलरामः तान् वदति - "भवन्तः निश्चिन्ताः भवन्तु । स्वकर्तव्यानि निर्वहन्तु । आवां शीघ्रं प्रत्यागच ्छावः" इति ।

यशोदां रोहिणीं च नमस्कृत्य तौ वदतः - "भवत्यौ दुःखं मा कुरुताम् । आवां सुखेन प्रत्यागच्छावः" ततः सर्वान् नमस्कृत्य तौ रथेन मथुरां गच्छतः ।